# श्रीसोमनाथसंस्कृतयुनिवर्सिटी,वेरावलम्

## सत्रान्तपरीक्षा – डिसेम्बर – २०१८

**कक्षा** – शास्त्रीप्रथमवर्षम् (SEM- 1) **प्रश्नपत्रम्** – ७ **गुणाः** - ७०

**विषयः** - साहित्यम् **कोड – CE 1.1.1** **समयः** - ०२ तः ०५

**दिनाङ्कः** - २१/१२/२०१८ **सन्दर्भग्रन्थः** – साहित्यदर्पण: परिच्छेदौ १ - २

**(NEW & OLD)**

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ द्वयोः ससन्दर्भं व्याख्यां कुर्वन्तु ।** १०

१) शरदिन्दु सुन्दररुच्चिेतसि सा मे गिरां देवी ।
अपहृत्य तम:सन्ततमर्थानखिलान्प्रकाशयतु ॥

२) कीटानुविद्धरत्नादिसाधारण्येन काव्यता ।
दु ष्टेष्वपि मता यत्र रसाद्यनुगमः स्फुटः ॥

३) अदोषं गुणवत्काव्यमलकारैरलंकृतम्
रसान्वितं कविः कुर्वन्कीर्तिं प्रीतिं च विन्दति ॥

**प्रश्नः – २ कस्याप्येकस्य यथाग्रन्थं उत्तरं लिखत ।** १०

**१) काव्यस्य प्रयोजनं प्रतिपाद्य प्रमाणानि दर्शनीयानि ।**

**२) वेदादिषु सत्सु चतुवर्गफलप्राप्तये काव्यस्य कियानुपयोगः ? इति लिखत ।**

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ३ द्वयोः ससन्दर्भप्रसङ्गं व्याख्यां कुर्वन्तु ।** १०

(१) वाक्योच्चयो महावाक्यम् इत्थं वाक्यं द्विध मतम् ।

(२) अर्थो वाच्यश्च लक्ष्यश्च व्यङ्ग्यश्चेति त्रिधा मत: ।

(३) वाच्योऽर्थोभिधया बोध्यो लक्ष्यो लक्षणया मत: ।
व्यङ्ग्यो व्याञ्जनया ता: स्यु: तिस्र: शब्दस्य शक्तय: ॥

**प्रश्नः – ४ कस्याप्येकस्य पङ्क्तियात्मकमुत्तरं लिखतु** १०

**(१)वाक्यस्य योग्यतास्वरूपं वर्णयत ।**

**(२)वाक्यमित्युक्ते पदलक्षणं प्रतिपादयत ।**

## तृतीयान्विति:(Unit - 3)

**प्रश्नः – ५ द्वयो: ससन्दर्भं व्याख्यां कुर्वन्तु ।** **१०**

१. मुख्यार्थबाधे तद्युक्तो य्याऽन्योऽर्थ: प्रतीयते ।
रूढे: प्रयोजनाद् वाऽसौ लक्षणाशक्तिरर्पिता ॥

२. अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियान्त्रिते ।
एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साऽभिधाऽऽश्रया ॥

३. अभिधाऽऽदित्रयोपाधि – वैशिष्ट्यात् त्रिविधो मत: ।
शब्दोऽपि वाचकस्तद्वल्लक्षको व्यञ्जकस्तथा ॥

**प्रश्नः – ६ एकस्य प्रश्नस्य निबन्धात्मकमुत्तरं लिखन्तु** **१०**

**१) का नाम लक्षणा ? कुत्र कथं चाऽस्या: प्रयोग: कतिविधा च सा ? इति सोदाहरणं लिख्यताम् ।**

**२) व्यञ्जनास्वरूपं निरूप्यताम् ।**

## अन्वितय: १ – ३ (Unit 1 – 3)

**प्रश्नः – ७ दशप्रश्ना: संक्षेपेण समाधेया: ।** **१०**

१) आचार्यविश्वनाथस्य पितु: नाम किम् ?

२) प्रथमपरिच्छेदस्य नाम किम् ?

३) नरत्वं दुर्लभं लोके– कस्य पुराणस्य वाक्यम्?

४) रीतिरात्मा काव्यस्येति केन उक्तम् ?

५) विश्वनाथस्य काव्यलक्षणं किम्?

६) पदोच्चस्य योग्यता का ?

७) को नाम गुण: ?

८) प्रयोजने लक्षण-लक्षणाया: किं उदाहरणम् ?

९) कदा लक्षणा: शुद्धा: भवन्ति ?

१०) वाच्यार्थ: क: ?

११) द्वितीयपरिच्छेदे कति कारिका: सन्ति ?

१२) आर्थीव्यञ्जनाया: कति भेदा: भवन्ति ?

१३) सशंखचक्रो हरि: - कस्य उदाहरणम् ?

१४) द्वितीयपरिच्छदस्य मुख्यविषय: क: ?

१५) द्वितीयपरिच्छदस्य नाम किम् ?

*****************